# Shri Sharada Stava 4

# श्रीशारदास्तवः ४

## Document Information

Text title : Sharada Stava 4

File name : shAradAstavaH4.itx

Category : devii, sarasvatI, ApaTIkara

Location : doc_devii

Author : ma. sa. ApaTIkara

Transliterated by : Mandar Mali aryavrutta gmail.com

Proofread by : Mandar Mali aryavrutta gmail.com

Description/comments : stotrapanchadashI by Shri M. S. Apatikar, Satara

Source : Sharada year 11, Vol 21-22, September 1970

Acknowledge-Permission: Pt. Vasant A. Gadgil, Sharada Gaurava Granthamala, 425 Sadashv Peth, Pune 30

Latest update : September 14, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose. Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

**Please help to maintain respect for volunteer spirit.**

September 15, 2019

*sanskritdocuments.org*

Shri Sharada Stava 4

# श्रीशारदास्तवः ४

(पृथ्वी)

नमामि धवलांशुकां सरसिजासनां शारदां
नमामि तिमिरापहां सकलबुद्धिदां देवताम् ।
नमाम्यमरपूजितां विविध-गीत-सन्तोषितां
नमामि शरणार्थिनां व्यसननाशिनीं सिद्धिदाम् ॥ १॥

नमामि सरसीरुहासन-विभूषितां सुन्दरीं
करे स्फटिकमालिकां विदधतीं प्रसन्नाननाम् ।
सदाऽध्ययनतत्परान् सततभक्तिसेवारतान्
जनानवसि शारदे सकल सौख्यदे देवते ॥ २॥

न राज्यमपि कामये न च सूखेऽपि मे कामना
न कीर्तिमपि काङ्क्षते मम मनो यशोदायिनि ।
मदीयहृदये दयामयि सदा निवासं कुरु
त्वदीयगुणकीर्तने मम रतिः सदा वर्धताम् ॥ ३॥

त्वमेव वरदायिनी सकलवाङ्मयाधीश्वरी
सुकीर्तिधनदायिनी त्वमसि देवि वीणाधरे ।
नमन्ति विबुधाः सदा तव पदारविन्दद्वयं
त्वमेव भव शारदे भवनिधौ ममोद्धारिणी ॥ ४॥

तवैव कृपया विधिः सृजति देवि विश्वावलीं
सरस्वति मुरारिणा जगदिदं सुसंरक्षितम् ।
तवैव कृपया हरो हरति विश्वपापावलीं
कृपा न तव चेत्कथं हरिहरादयः पान्तु नः ॥ ५॥

त्रिलोकभयनाशिनी त्रिविधतापसंहारिणी
सुधामधुरभाषिणी सुमनसां यशोदायिनी ।
सुवर्णपदधारिणी नवरसैश्च सन्तोषिणी

मम‍ागुणविनाशिनी भवतु साऽथ तेजस्विनी ॥ ६॥

सदैव कविमानसे विजयसे जगन्मोहिनी
मरालनृपवाहिनी मधुरमालपन्ती सदा ।
नितान्तरमणीयतां विदधती सुवर्णायुता
मदीयमनसि स्थिता भवतु दिव्यवागीश्वर ॥ ७॥

अनल्पसुखदायिनी दुरितदुःखविध्वंसिनी
सुभाषितसुभाषिणी नवरसाम्बुसन्तोषिणी ।
मनोमलविनाशिनी सकलसौख्यनिष्यन्दिनी
मदन्तरनिवासिनी भव सदैव मेधाविनी ॥ ८॥

इमं संस्तवं शारदायाः सुरम्यं
पठेत् प्रत्यहं सादरं मानवो यः ।
जडत्वं मतेस्तस्य नीत्वा विनाशं
प्रसन्ना भवेत् शारदा ज्ञानदात्री ॥ ९॥

इति श्री आपटीकरविरचितः श्रीशारदास्तवः सम्पूर्णः ।

Encoded and proofread by Mandar Mali aryavrutta gmail.com

*Shri Sharada Stava 4*

pdf was typeset on September 15, 2019

Please send corrections to *sanskrit@cheerful.com*